# Vasudevakritam 1 Shri Krishna Stotram

# वसुदेवकृतं १ श्रीकृष्णस्तोत्रम्

## Document Information

Text title : Vasudevakritam 1 Shri Krishna Stotram

File name : vasudevakRRitaM1shrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, brahmapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmapurANa | adhyAya 193/80-90||

Latest update : September 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 28, 2024

*sanskritdocuments.org*

# वसुदेवकृतं १ श्रीकृष्णस्तोत्रम्

वसुदेव उवाच ।
प्रसीद देवदेवेश देवानां प्रवर प्रभो ।
तथाऽऽवयोः प्रसादेन कृताभ्युद्धार केशव ॥ ८० ॥

आराधितो यद्भगवानवतीर्णो गृहे मम ।
दुर्वृत्तनिधनार्थाय तेन नः पावितं कुलम् ॥ ८१ ॥

त्वमन्तः सर्वभूतानां सर्वभूतेष्ववस्थितः ।
वर्तते च समस्तात्मंस्त्वत्तो भूतभविष्यती ॥ ८२ ॥

यज्ञे त्वमिज्यसेऽचिन्त्य सर्वदेवमयाच्युते ।
त्वमेव यज्ञो यज्वा च यज्ञानां परमेश्वर ॥ ८३ ॥

सापह्नवं मम मनो यदेतत्त्वयि जायते ।
देवक्याश्चाऽऽत्मजप्रीत्या तदत्यन्तविडम्बना ॥ ८४ ॥

त्वं कर्ता सर्वभूतानामनादिनिधनो भवान् ।
क्व च मे मानुषस्यैषा जिह्वा पुत्रेति वक्ष्यति ॥ ८५ ॥

जगदेतज्जगन्नाथ सम्भूतमखिलं यतः ।
कया युक्त्या विना मायां सोऽस्मत्तः सम्भविष्यति ॥ ८६ ॥

यस्मिन्प्रतिष्ठितं सर्वं जगत्स्थावरजङ्गमम् ।
स कोष्ठोत्सङ्गशयने मनुष्याज्जायते कथम् ॥ ८७ ॥

स त्वं प्रसीद परमेश्वर पाहि विश्व-
मंशावतारकरणैर्न ममासि पुत्रः ।
आब्रह्मपादपमयं जगदीश सर्वं
चित्ते विमोहयसि किं परमेश्वरात्मन् ॥ ८८ ॥

मायाविमोहितदृशा तनयो ममेति

कंसाद्भयं कृतवता तु मयाऽतितीव्रम् ।
नीतोऽसि गोकुलमरातिभयाकुलस्य
वृद्धिं गतोऽसि मम चैव गवामधीश ॥ ८९॥

कर्माणि रुद्रमरुदश्विशतक्रतूनां
साध्यानि यानि न भवन्ति निरीक्षितानि ।
त्वं विष्णुरीशजगतामुपकारहेतोः
प्राप्तोऽसि नः परिगतः परमो विमोहः ॥ ९०॥

इति श्रीब्रह्मपुराणे त्रिनवत्यधिकशततमाध्यायान्तर्गतं
वसुदेवकृतं श्रीकृष्णस्तोत्रं समाप्तम् ।

ब्रह्मपुराण । अध्याय १९३/८०-९०॥

brahmapurANa . adhyAya 193/80-90..

Proofread by PSA Easwaran

---

*Vasudevakritam 1 Shri Krishna Stotram*

pdf was typeset on September 28, 2024

Please send corrections to *sanskrit@cheerful.com*